RAMAIAH INSTITUTE OF BUSINESS STUDIES
LIBRARY
BANGALORE-54

SE – 052

III Semester B.C.A./B.H.M. Examination, Jan./Feb. 2026
(SEP 2024-25)
LANGUAGE SAMSKRITAM – III
Champu Ramayana of Bhoja – Aranya Kanda and Comprehension

Time : 3 Hours — Max. Marks : 80

Instructions : *i) Answer in **Samskritam/Kannada/English**.*
*ii) Question No. **I** and **VI** mains should be answered in **Samskritam** only.*

I. समीचीनम् उत्तरं चित्वा लिखत । **(10×1=10)**
ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.
Choose the correct answer and write.

1) चम्पूरामायणस्य कर्ता कः ?
अ) अनन्तभट्टः आ) भोजराजः इ) विष्णुशर्मा ई) भासः

2) भोजस्य पिता कः ?
अ) वत्सराजः आ) मुञ्जः इ) सिन्धुलः ई) नकुलः

3) रामायणे कति काण्डाः सन्ति ?
अ) पञ्च आ) षट् इ) सप्त ई) अष्ट

4) मैथिलीवल्लभः कः ?
अ) अर्जुनः आ) सहदेवः इ) नकुलः ई) श्रीरामः

5) सौमित्रिः कः ?
अ) श्रीरामः आ) लक्ष्मणः इ) भरतः ई) रावणः

6) दशशतनयनः कः ?
अ) इन्द्रः आ) अग्निः इ) वायुः ई) वरुणः

7) कुम्भयोनिः कः ?
अ) कृपः आ) वसिष्ठः इ) अगस्त्यः ई) विश्वामित्रः

P.T.O.

Scanned with OKEN Scanner

8) गृध्रराजस्य नाम किम् ?

अ) जटायुः आ) वायुः इ) हेमन्तः ई) गरुडः

9) राक्षसचक्रवर्ती कः ?

अ) कुबेरः आ) श्रीरामः इ) रावणः ई) मारीचः

10) तपनतनयः कः ?

अ) हनुमान् आ) जाम्बवन्तः इ) सुग्रीवः ई) वाली

II. **द्वयोः** प्रबन्धरूपेण उत्तरं लिखत । **(2×10=20)**

ಯಾವುದಾದರೂ **ಎರಡಕ್ಕೆ** ಪ್ರಬಂಧ ರೂಪದಲ್ಲಿ ಉತ್ತರಿಸಿ.

Write an essay on **any two** of the following.

1) चम्पूकाव्यस्य उत्पत्ति-विकासश्च अधिकृत्य लिखत ।

ಚಂಪೂ ಕಾವ್ಯದ ಉತ್ಪತ್ತಿ ಮತ್ತು ವಿಕಾಸದ ಕುರಿತು ಬರೆಯಿರಿ.

Write about the origin and development of Champu Kavya's.

2) अरण्यकाण्डस्य सारांशं लिखत ।

ಅರಣ್ಯಕಾಂಡದ ಸಾರಾಂಶವನ್ನು ಬರೆಯಿರಿ.

Write the summary of Aranya Kanda.

3) शूर्पणखाप्रसङ्गम् अधिकृत्य लिखत ।

ಶೂರ್ಪಣಖಾ ಪ್ರಸಂಗದ ಕುರಿತು ಬರೆಯಿರಿ.

Write about the Shurpanakha incident.

III. श्लोकानाम् अनुवादं कृत्वा विवृणुत । (**चत्वारि** एव) **(4×4=16)**

ನಾಲ್ಕು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ, ವಿವರಿಸಿ.

Translate and explain **any four** Shlokas.

1) प्रविश्य विपिनं महत्तदनु मैथिलीवल्लभौ
महाबलसमन्वितश्चलितनीलशैलच्छविः ।
निशाचरवानलप्रशमनं विधातुं शरै-
-श्चचार सशरासनः सुरपथे तडित्वानिव ॥

INSTITUTE OF BUSINESS STUDIES
LIBRARY
BANGALORE

2) दशशतनयनोऽपि वीक्ष्यमाणे दशरथपुत्रमिषेविषेव जाता ।
मनसिजशरभङ्गकारिवृत्तेर्मनसि मुनेः शरभङ्गनामभाजः ॥

3) पानेन हीनजलमब्धिमपास्य नूनं
मैनाक एष मुनिमाश्रयतीति जाताम् ।
शङ्कामिमां रघुपतेः कथितात्मवंश-
स्त्वत्तातमित्रमहमित्यहरज्जटायुः ॥

4) लावण्याम्बुनिधेरमुष्य दयितामेनामिवैनं जनं
कस्मान्नासृजदस्मदन्वयगुरोरुत्पत्तिभूः पद्मभूः ।
आस्तां तावदरण्यवासरसिके हा कष्टमस्मिन्निमां
कान्तिं काननचन्द्रिकासमदशां किं निर्ममे निर्ममे ॥

5) स दण्डकायां कृतदण्डकायां स्वसारमेनां प्रथितस्वसारः ।
निशाम्य रामस्य निशम्य वृत्तं चक्रे रुषं राक्षसचक्रवर्ती ॥

6) अशोकवनिका लेभे राक्षसीपरिवेष्टिताम् ॥
सीतां मारुतिबालाग्निस्तम्भनार्हामिवौषधिम् ॥

IV. त्रयाणां वाक्यानां सन्दर्भं विवृणुत । **(3×4=12)**

ಯಾವುದಾದರೂ **ಮೂರು** ವಾಕ್ಯಗಳ ಸಂದರ್ಭವನ್ನು ವಿವರಿಸಿ.

Explain with reference to context on **any three** of the following.

1) कौ युवां युवानौ ?

2) महामहीध्रकल्पं गृध्रराजमद्राक्षीत् ।

3) भद्रे ! तस्यार्यस्य दासोऽहम् ।

4) हा नाथ ! क्व चिरायसीति ।

5) भुजाभ्यां बबन्ध यथार्थनामा कबन्धः ।

RAMAIAH INSTITUTE OF BUSINESS STUDIES
LIBRARY
BANGALORE-54

Scanned with OKEN Scanner

V. त्रयाणां लघुटिप्पणी: लिखत । **(3×4=12)**

ಯಾವುದಾದರೂ ಮೂರನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿಯನ್ನು ಬರೆಯಿರಿ.

Write short notes on **any three** of the following.

1) पञ्चचम्पूकाव्यानि ।

2) विश्वगुणादर्शचम्पू ।

3) श्रीराम: ।

4) शूर्पणखा ।

5) जटायु: ।

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(5×2=10)**

शास्त्रं च शस्त्रं इति द्वे विद्ये प्रतिपत्तये । इति वदन्ति नीतिविद: । शास्त्रेण ज्ञान प्रवर्धनं भवति । शस्त्रेण शक्तिवर्धनं भवति । सर्वै: आचार्यमाणे विजयदशमी महोत्सवे उभयो: शास्त्रशस्त्रयो: सम्बन्ध: वरीवर्तते । अत: अस्मिन् सन्दर्भे देशे सर्वत्र शस्त्रस्य तथा शास्त्रस्य पूजा श्रद्धालुभि: विहिता भवति । प्रयत्नेन आर्जितां विद्यां, भगवत्या अनुगृहीतां शक्तिं च लोकसंकट निवारणाय यदि उपयोगं कुर्म: तर्हि जीवनस्य सार्थक्यं साधितं स्यात् ।

प्रश्ना :

1) द्वे विद्ये के ?

2) शस्त्रेण किं साधितं भवति ?

3) विजयदशमी महोत्सवे कयो: सह सम्बन्ध: वर्तते ?

4) शक्ति: कया अनुगृहीता ?

5) जीवनसार्थक्यं केन साधितं भूयात् ?

STITUTE OF B
LIBRAR
Scanned with OKEN Scanner